பர்ணாலக்ரஹணாக்யானம்



தஞ்சாவூர் மகாராஜா சரபோஜியின்

சரசுவதி மகால் நூலகம்

தஞ்சாவூர்

தஞ்சாவூர் சரசுவதி மகால் வெளியீட்டு எண் : 487

श्रीः

श्रीजयरामकविविरचितम्

॥ पर्णालग्रहणाऽऽख्यानम् ॥

ஜயராமகவி இயற்றிய

பர்ணாலக்ரஹணாக்யானம்

பதிப்பாசிரியர்:
தேதியூர் S. கிருஷ்ணமூர்த்தி சாஸ்த்ரிகள்,
ஓய்வு பெற்ற மேநிலை ஸம்ஸ்க்ருத பண்டிட்,
சரசுவதி மகால் நூலகம்,
தஞ்சாவூர்.

தஞ்சாவூர் மகாராஜா சரபோஜியின்
சரசுவதி மகால் நூலகம்
தஞ்சாவூர்.

பர்ணாலக்ரஹணாக்யானம்

2006 விலை : ரூ. 60

0487

T.M.S.S.M-2016

நூற்பதிப்பு விளக்கக் குறிப்பு

நூற்பெயர்	: பர்ணாலக்ரஹணாக்யானம்
பதிப்பாசிரியர்	: தேதியூர் S. கிருஷ்ணமூர்த்திசாஸ்த்ரிகள்
வெளியிடுபவர்	: இயக்குநர், சரசுவதி மகால் நூலகம்
வெளியீட்டு எண்	: 487
மொழி	: சம்ஸ்கிருதம்
பதிப்பு	: முதற் பதிப்பு
வெளியீட்டு நாள்	: 2006
தாள்	: TNPL 18.6 kgs.
நூல் அளவு	: 21 x 14 c.m.
பக்கங்கள்	: 52
படிகள்	: 250
எழுத்து	: 16 & 12
அச்சிட்டோர்	: சரசுவதி மகால் நூலக அச்சகம்
புத்தகக்கட்டு	: மெலிந்த அட்டை
பொருள்	: சரித்திரம்
விலை	: ரூ. 60

வெளியீட்டாளர் முகவுரை

உலகின் அறிவு நூல் களஞ்சிய மையங்களில் ஒன்றாகவும், ஒப்புயர்வற்றதாகவும் திகழுகின்ற சிறப்புடைய நிறுவனம் சரசுவதி மகால் நூலகம் ஆகும்.

பல மொழிகளைச் சார்ந்த ஏராளமான அரிய பனையோலைச் சுவடிகள், காகிதச் சுவடிகள், பன்மொழித்துறைகள், அருங்காட்சியகம் முதலிய வற்றைத் தன்னகத்தே கொண்டு எண்ணற்ற ஆய்வாளர் களையும், வாசகர்களையும், சுற்றுலாப் பயணிகளையும் எட்டுத் திக்கிலிருந்தும் ஈர்த்துவருகின்றது இந்நூலகம்.

நம் நூலகத்தில் T. 4227 எண்ணுள்ள இந்நூல் **'பர்ணாலக்ரஹணாக்யான'**மாகும் இந்நூல் அளவில் மிகச்சிறியது. காவியக் கூறுகள் இந்நூலில் இல்லை. இருப்பினும் முகலாயப் படை வீரர்களிடமிருந்து வீரசிவாஜி பர்னால (பனால) எனும் கோட்டையை வீரமிக்க வீரர்கள் துணையோடு கைப்பற்றிய தீரத்தை இச்சிறு நூல் எடுத்துக்கூறுகிறது. இந்நூல் எளிமையான சொற்கள் கொண்டது. 'அனுஷ்டுப்' எனும் சந்தத்தில் அமைந்தது. சிவாஜி தனது இந்த வீரமிக்க வெற்றிக்கு அன்னை பவானியே காரணமென அன்னை பவானி கோவிலுக்குச் சென்று மெய்மறந்து வணங்கியதை கவி வருணித்துப் போற்றுகிறார். அன்னையின் அணிகலன் களையும் ஆயுதங்களையும் கருணைகளையும் சிறப்பாக வருணித்துள்ளார்.

இந்நூலக ஓய்வுபெற்ற சமஸ்கிருத மேநிலைப் பண்டிதர் திரு. தேதியூர் எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள், இந்நூலை மிகச்சிறப்பாகப் பதிப்பித்துள்ளார். அன்னாருக்கு என் பாராட்டுக்கள்.

இந்நூல் வெளிவர நிதி உதவி நல்கிய நடுவண் அரசுக்கும், நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும், இந்நூல் கணினி அச்சில் வெளிவர கணினிப் பிரிவில் பணிபுரியும் அனைவருக்கும் என் இனிய பாராட்டுதல்களைத் தெரிவித்துக்கொள்கிறேன்.

சா. விஜயராஜ் குமார், இ. ஆ. ப.,
மாவட்ட ஆட்சித்தலைவர் மற்றும்
இயக்குநர்,
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்
18 - 8 - 2006

---- ❖ ----

முன்னுரை

சுதந்திரப்ப்ரியரான மாவீரர் மஹாராஷ்டிர மன்னர் வீர சிவாஜியின் வாழ்க்கை பெரும் சாகசங்கள் நிறைந்தது. அவருடைய வாழ்நாளில் முகலாய மன்னர்களுடன் பல்லாண்டுகள் இடைவிடாது போராட்டம் நடத்த வேண்டியிருந்தது.

அந்த வீரத்திருமகனின் சுயநலமற்ற பெருந்தன்மையும், தெய்வபக்தியும், அஞ்சா நெஞ்சமும், பெண்டிர்பால் அவர்கொண்டிருந்த நன்மதிப்பும் ஒவ்வொரு இந்திய பிரஜையாலும் நினைவு கூறத்தக்கவை, பின்பற்றத்தக்கவையும்கூட.

தஞ்சையில் மராட்டிய மன்னர்களின் நல்லாட்சி நடைபெற்றபோதும், முகலாய மன்னர்களுடனான வீரசிவாஜியன் போராட்டம் தொடர்ந்தது. தஞ்சையை வீரசிவாஜியின் தம்பி வெங்கோஜி ஆண்டுவந்த சமயம் மஹாராஷ்டிரத்தில் வீரசிவாஜி நிகழ்த்திய சாகசச் செயல்கள் பற்றி பன்மொழிப்புலவர்களால் பலநூல்கள் இயற்றப்பட்டன. அவற்றுள் வீரசிவாஜி பர்ணால (பனால) என்னும் கோட்டையை (இது கோல்ஹாபூர் அருகில் உள்ளது) சொற்ப வீரர்களைக்கொண்டே கைப்பற்றிய நிகழ்ச்சி பற்றி ஜயராமகவி என்பவர் ஸம்ஸ்க்ருத மொழியில் "பர்ணால-கிரஹண ஆக்யானம்" என்ற நூலை இயற்றி மன்னர் வெங்கோஜியின் அரசவையில் அரங்கேற்றம் செய்துள்ளார்.

இந்நூலுக்கு மராட்டிய மொழியில் உரை ஒன்றும் உள்ளது. வீரசிவாஜி பர்ணால(பனால) எனும் மலைக்கோட்டையினை, பல உபாயங்களை மேற்கொண்டு வீரதீரம் மிக்க வீரர்களைக்கொண்டே முகலாயப் படைவீரர்களிடமிருந்து கைப்பற்றியது பற்றி கவி இயற்றிய இச்சிறு நூல் ஐந்து அத்யாயங்களைக் கொண்டது. எளிய சொற்களுடன் அனுஷ்டுப் எனும் சந்தத்தில் (METRE) அமைந்ததுதான் என்றாலும் கவி குறிப்பிடும் முகலாய வீரர்களின் பெயரும் மராட்டிய வீரர்களின் பெயர்களும் கோட்டைகளின் பெயர்களுமே இந்நூலை கடினமாக கருதச்செய்கிறது.

காவிய முறையில் இந்நூல் எழுதப்படவில்லை. காவியங்களுக்கு உரிய லக்ஷணங்கள் இல்லை. வருணனைகளும் இல்லைதான். ஆனால் வீரசிவாஜி, கோட்டை பிடிபட்ட செய்தியை அறிவித்த மராட்டிய வீரர்களுக்கு தாம்பூலம் முதலான சன்மானம் அளிக்கச்செய்து, குதிரை வீரர்களுக்கும், யானைப்படை யினருக்கும் தம் கையாலேயே தகுதிக்கு ஏற்ப

गृहीतोऽसौ पनालाख्यः पर्वतोऽत्युच्चकैर्वदन् ।
ददौ पत्रं ततः पश्चात् जानुभ्यां अवनीं गतः ॥

பனால் மலை பிடிபட்டது என்று உறக்கக் கூறியவாறு கடிதத்தை தூதன் கொடுத்து வணங்கினான். செய்தியறிந்த மன்னர் சிவாஜி நற்செய்தி கொண்டு வந்தவர்களை சன்மானமளித்து மகிழ்வித்தார். குதிரை வீரர்களுக்கும், யானைப்படையினருக்கும் தன் கையாலேயே தகுதிக்கு ஏற்ப சன்மானமளித்தார்.

वाजिवाहान् दन्तिवहान् हेषा बृंहित संकुलान् ।
स्वहस्तेन यथामानं सम्भव्य . . . . ॥

சிவாஜி மன்னர் தமது வெற்றிகளுக்கு ஸ்ரீபவானிதேவியின் கருணையே காரணம் என்று கருதிவந்தவர் என்பதால் இந்த வெற்றிக்கும் காரணம் அன்னை பவானி தேவியே என்று எண்ணி அன்னையின் ஆலயம் சென்று ஆலயத்தின் வாயிலில் காலணிகளைக் கழற்றிவிட்டு கால்களை அலம்பி சுத்தம் செய்து கொண்டு கோஸ்வாமியை (ஆலய பூஜகரை) வணங்கினார். கோஸ்வாமி தம் இரு கைகளையும் மன்னர் சிவாஜியின் சிரசில் வைத்து பூர்ண சாம்ராஜ்யலக்ஷ்மி கிடைக்கட்டும் என ஆசீர்வதிக்க மன்னர் கோயிலின் உள்ளே சென்று தங்கமயமான பீடத்தில் வீற்றிருக்கும் அன்னை பவானியை சாஷ்டாங்கமாக பன்முறை வணங்கினார்.

"प्रणम्य दण्डवद् भूमौ पुनः पुनः अतन्द्रितः"

இங்கு கவி அன்னை பவானியை உளமாறச் சிறப்பாக வருணித்துள்ளார்.

கால்களில் சிறுமணிகள் கோர்க்கப்பட்ட அணிகலன்கள் வைரங்கள் பதிக்கப் பெற்ற இடையணி ஒட்டியாணம், நவரத்னங்கள் பதிக்கப் பெற்ற கைவளையல்கள், மோதிரங்கள் முழுநிலவையொத்த முகம், காதுகளில் ஒளிரும் தாடகங்கள், எல்லையற்று நீண்ட தலைவகிட்டில் சிந்தூரம் உதட்டின் சிகப்பினால் மேலும் பிரகாசிக்கும் மூக்குத்திகள், எட்டு கைகளிலும் ஆயுதங்கள், கருணைத் ததும்பும் முகம் என்று சிறப்பாக வருணித்துள்ளார்.

சரசுவதி மகால் நூலகத்தில் D. 4227 எண்ணுள்ள இந்த நூலைப் பதிப்பிக்கும் பணி 1995ம் ஆண்டில் நான் இந்நூலகத்தில் பணிபுரிந்த சமயம் மேற்கொள்ளப் பட்டது. வீரசிவாஜி மன்னரின் மரபில் தோன்றிய

மன்னர் சரபோஜியின் வழிவந்த அரச குடும்பத்தினர் தம் குலத்தலைவரின் சிறப்புக்களை அறிந்து மகிழும் வண்ணம் இந்நூலைப் பதிப்பித்து வெளியிட ஆணையிட்ட அன்றைய தஞ்சை மாவட்ட ஆட்சித் தலைவர் மற்றும் நூலக இயக்குநர் அவர்களுக்கும், இன்றைய தஞ்சை மாவட்ட ஆட்சித்தலைவரும் நூலக இயக்குநருமான திரு. சா. விஜயராஜ் குமார், இ. ஆ. ப. அவர்களுக்கும், சரசுவதி மகால் நூலக நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம், எம். ஏ., அவர்களுக்கும் என் நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

இந்நூலை நன்முறையில் அச்சிட்டுத்தந்த நூலக கணினி பிரிவினருக்கும், நூற்கட்டுப் பிரிவினருக்கும் என நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

தேதியூர் S. கிருஷ்ணமூர்த்தி சாஸ்த்ரிகள்,
ஒய்வுபெற்ற மேநிலை ஸம்ஸ்கிருத பண்டிட்,
சரசுவதி மகால் நூலகம்,
தஞ்சாவூர்.

சென்னை - 33
15-7-06

---- ❀ ----

॥ श्री गणेशाय नमः ॥

श्रीजयरामकविविरचितम्

॥ पर्णालग्रहणाऽऽख्यानम् ॥

(शिवराजचरित्रम्)

गणाधीशं नमस्कृत्य वाग्देवीं च गुरुं तथा ।
पर्णालग्रहणाख्यानं श्रीशिवाख्यस्य वर्ण्यते ॥ 1

तत्रातिप्रीतितः श्रोता वीरत्रयधुरन्धरः ।
निरूप्यते स एवादौ शृणुध्वमवधानतः ॥ 2

आस्तेऽस्मिन्भूतले श्रीमान् एक एव महीपतिः ।
सर्वलक्षणसम्पन्नः शौर्यौदार्यगुणान्वितः ॥ 3

स राजा राजकार्यार्थकुशलैः सचिवैः सह ।
कविभिः पण्डितैर्भ्राजत्सभ्याभरणभूषितः ॥ 4

ज्योतिर्विद्भिर्भिषग्वर्यैः शूरैर्निस्त्रिंशपाणिभिः ।
अन्यैरपि सभास्तारैर्दूतैर्देशान्तरागतैः ॥ 5

विस्तीर्णास्तरणे क्षौमचित्रकम्बलशोभिते ।
सौवर्णराजतैः स्तम्भैःपट्टसूत्रसुवेष्टितैः ॥ 6

नानावितानसंमिश्रवस्त्रविस्तीर्णमण्डिते[1] ।
सिह्मासने स्वर्णदण्डछत्रचामरशोभितः ॥ 7

प्रस्फुरद्रत्न विद्योत[2]वल्गितोत्तंसमण्डितः ।
मुक्तामणिमयैर्दिव्यैः कुण्डलैः कङ्कणैस्तथा ॥ 8

केयूरहारविलसन्मुद्रिकाभिरलङ्कृतः ।
सौवर्णबिन्दुललितैः प्रोल्लसद्भिविदायुधैः ॥ 9

भृत्यहस्तस्थितैर्हृष्टस्तालव्यजनवीजितः ।
गायकैर्वाद्यनिपुणैर्बन्दिभिःस्तुतिपाठकैः ॥ 10

नटनर्तकमुख्यैश्च यथास्थाननिवेशितैः ।
सभायाः पूर्वभागार्धवेदिकासु स्थितैः स्तुतः ॥ 11

कृपाकटाक्षदृष्टचासौ जनः स्वामिन् विलोक्यताम् ।
रौप्यवेत्रधरैरित्थं नामग्रहणपूर्वकम् ॥ 12

निवेदितेन लोकानां निवहेन नमस्कृतः ।
अत्रान्तरे समागत्य द्वाःस्थेनेत्थं निवेदितम् ॥ 13

आयान्ति गजमारुह्य जयरामकवीश्वराः ।
ससम्भ्रमं ततो राजा हर्षोत्फुल्लविलोचनः ॥ 14

तदग्रे प्राहिणोत्तूर्णं सचिवं पण्डितैः सह ।
ततस्तैरेव सहितः प्रविवेश सभान्तरे ॥ 15

---

1. मण्टपे इति पाठान्तरं सङ्गतं च ॥

2. वलित इति पाठान्तरम् ।

प्रत्युत्थानादिसन्मानैर्नमस्कृत्य ततः कविम् ।
पप्रच्छ कुशलं श्रीमदग्रजस्य महीभुजः ॥ 16

स्वामिनो रामचन्द्रस्य विनीतो भरतो यथा ।
कविर्निवेदयाञ्चक्रे सर्वं कुशलपूर्वकम् ॥ 17

शृणु तावन्महाराज [1]श्रीशिवाग्रजस्य ते ।
चरितं देववर्यस्य विष्णोरिव जगत्प्रभोः ॥ 18

कल्किनो निष्कलङ्कस्य तुरुष्कवरमर्दनम् ।
प्रोच्यते भावि यच्छास्त्रे तदिदानीं निरूप्यते ॥ 19

यथाभूतं हि तद्युद्धं कविभिर्वर्णितं पुरा ।
मयापि तत्प्रसादेन किञ्चिदाकर्ण्य वर्णितम् ॥ 20

महाराजाधिराजोऽपि शृण्वन्तुष्टोऽभवत्पुरा ।
भवद्भिरपि यद्गौरीविलासाख्ये सभान्तरे ॥ 21

बेङ्गलूराख्यनगरे श्रुतं पूर्वार्धमादितः ।
तस्मादेवाहमाहूतः श्रीमद्भिः श्रोतुमुत्सुकैः ॥ 22

ततः कतिपयैर्वर्षैर्मया काव्यानि तन्वता ।
छन्दो विनिर्मितं तस्मिन् कृतः सर्वस्य सङ्ग्रहः ॥ 23

सोऽयं स(सु)विस्तरात्सर्वः श्रुतः किल [2]रसाकुलैः ।
भवद्भिश्च तथान्यैश्च राजवंशधुरन्धरैः ॥ 24

---

1. श्रीशिवस्याग्रजस्य ते इति सङ्गतः पाठः ।
2. रसाकुलः इति पाठः सङ्गतो भाति ॥

राजोवाच–

श्रुतमस्ति मया पूर्वमिदानीन्तनमादितः ।
कथयन्तु कथं जातं भवतां राजदर्शनम् ॥ 25

इदानीं स्थीयते कस्मिन् महाराजेन पर्वते ।
वर्षत्रयमितो गत्वा भवद्भिर्यदनुष्ठितम् ॥ 26

तत्सर्वं श्रोतुमिच्छामि भवन्तः कवयः खलु ।

कविरुवाच –

मया द्वादशभाषाभिः [1]कविकर्म विरच्यते ॥ 27

[2]तञ्जादादौ महाराष्ट्रभाषया किल वर्णितम् ।
इतो राय(ज)गडे गत्वा गृहीतं राजदर्शनम् ॥ 28

ततः श्रीमच्छिवेनेयं सुरति(ती) लुण्ठिता पुनः ।
तद्धैन्दवमहाराष्ट्रभाषायुग्मेन वर्णितम् ॥ 29

ततः श्रीत्र्यम्बको नाम विख्यातः पुण्यपर्वतः ।
हर्षेण सह [3]सोऽप्यस्मिन् प्रयाणे स्ववशीकृतः ॥ 30

ततः कारञ्जनगरं श्रीकृष्णेन यथा पुरा ।
भागदत्तं पुरं तद्वल्लुण्ठयित्वा समागतम् ॥ 31

---

1. काव्यमिति वक्तव्ये कविकर्मेति काव्यशब्दव्युत्पत्तिक्रमेण निर्दिश्यते ॥ 2. तस्मादादौ ।
3. सहसाप्यस्मिन्निति महाराष्ट्र व्याख्यायुते प्रकाशने ॥

तदप्यहो महाराष्ट्रहिन्दुस्थानभवेन वै ।
भाषायुग्मेन विहितं ततः सह्याद्रिमुत्सुक[1]: ॥ 32

ग्गुलानामभूत्पूर्वं जगतीतलविश्रुतः ।
सोऽपि चात्यन्तविपुलस्ताम्रैरुग्रैः सुरक्षितः ॥ 33

तेभ्यस्तं सञ्जहाराशु महाराजो महाभुजः ।
ततः समभवद्युद्धं मध्ये मध्ये महत्तरम् ॥ 34

अलंग्कुरंगत्रिङ्गल वाटिकानामथोद्धतम् ।
अहिवन्तोऽचलगिरिर्मार्किण्डेयाभिधानकः ॥ 35

[2]प्रवलाजवलाख्यौ [3]हि यमलावरिदुर्ग्रहौ ।
गृहीतवानसौ राजा महाराजोऽग्रजस्तव ॥ 36

तथैव चामुण्डगिरिर्हरिश्चन्द्रस्तथैव च ।
महिषोऽ[4]प्यडसस्तावद्गृहीतावतिसङ्गरात् ॥ 37

ततो जीवधनाख्योऽसौ यवनानां गिरिर्महान् ।
जीवरूपो भवत्येषां तं च तेभ्योऽग्रहीन्नृपः ॥ 38

जवार इति यद्राज्यं किरातानां पुरातनम् ।
विक्रमाख्यस्य नृपतेर्विक्रमेणाग्रहीन्नृपः ॥ 39

---

1. मस्तकः इति महाराष्ट्रभाषाविवरणयुते प्रकाशने ।
2. खलेति पाठान्तरे ।
3. खलाख्यावप्यमलावति दुर्गहाविति महाराष्ट्रभाषाव्याख्यायुत प्रकाशने । 4. अङ्सरस्तावदिति पाठान्तरम् ।

तयैव रामनगरं सोमशाहस्य विश्रुतम् ।
जगृहे लीलयैवायं लीलाविग्रहवाञ्छिवः ॥ 40

प्रत्येकं नामकरणं नवीनं श्रीमहीभुजा ।
कृतमग्रे प्रवक्ष्यामि कथानां वै प्रसङ्गतः ॥ 41

वर्णितं तदहो किञ्चिन्महाराज निशम्यताम् ।

राजोवाच -

पर्णालाख्योऽतिविपुलः पर्वतोऽस्मन्महीपतेः ॥ 42

कृतसख्यस्यापि कथं गृहीतः केन हेतुना ।
यस्मिन् धान्यानि वृक्षाश्च फलानि कुसुमान्यपि ॥ 43

गोधनं लवणं तैलं तृणं काष्ठं नवं नवम् ।
स वर्धयति सर्वत्र कौपं दिव्यमिवोदकम् ॥ 44

हर्म्याणि च महार्हाणि वाजिनां गृहराजयः ।
गजानां च प्रजानां च विलसन्ति सलक्षणाः ॥ 45

आपणोऽप्यतिदीर्घोऽस्मिन् रत्नाकर इवापरः ।
सैनिकाश्चापि शतशश्चतुरङ्गबलान्विताः ॥ 46

परितः पर्यटन्नासीन्नागजित्सर्वलेखकः ।
लिखन्नपि च सर्वेषां वेतनं वेत्रपाणिभिः ॥ 47

जागरूकोऽर्धरात्रावप्यतिक्रूररवान्वितः ।
शृङ्गघण्टानिनादैश्च सम्मिश्रो यामिकव्रजः ॥ 48

प्राकारान्तर्बहिश्चैव दीपिकाशतसङ्कुलः ।
जागर्ति यावन्न भवेत्तरुणो ह्यरुणोदयः ॥ 49

एतादृशोऽति बलवान् पळार्धेनतिदूरतः ।
[1]पन्नगाधीश्वरेणाशु गृहीतो भुजगो यथा ॥ 50

तन्न कस्मादहो किञ्चिदेतावत्कर्म दुष्करम् ।
कृतं पुनरहोऽत्युग्रं दाजीस्वामिभिरेव हि ॥ 51

तत्सर्वमादौ श्रोष्यामि पश्चादन्यन्निगद्यताम् ।
इत्युक्तः स कविः प्राह तस्मै राज्ञे सविस्तरम् ॥ 52

आदितः सर्वमाख्यानं [2]पनालाख्यस्य तद्यथा ॥

कविरुवाच -

अधिकतरदयावान् दीर्घकालं निमग्नं
सुतमिव तुहिनाद्रेः सान्त्वयन् भीतपूर्वम् ।
शिवधरणिधरेन्द्रस्तं पनालाख्यमेवं
यवनजलधिमध्यादुच्चकैरुज्जहार ॥

इति श्रीमज्जयरामकविविरचिते पर्णालपर्वताख्याने
शिवराजचरित्रे प्रथमोऽध्यायः

---

1. पतगाधीश्वरेणेति सङ्गतःपाठः । 2. पर्णालाख्यस्य ।

॥ द्वितीयोऽध्यायः ॥

कविरुवाच –

क्षन्तव्यो मामकस्तावदसौ ह्यविनयो महान् ।
बालिशेन पुरा योऽसौ अतिलौल्यतया कृतः ॥ 1

यतो द्वादशभाषाणां कविरित्याभिधायितम् ।
तत्रापि संस्कृतैः काव्यं कर्तव्यं त्वतिदुर्घटम् ॥ 2

तस्मादस्मद्गुरुभ्योऽसावञ्जलिः प्रविधीयते ।
कृपाकटाक्षपाताभ्यामनुग्राह्यो भवाम्यहम् ॥ 3

इति सम्प्रार्थ्य मनसा गुरुं सभ्यांस्तथैव च ।
चरितं शिवराजस्य प्रोच्यते तन्निशम्यताम् ॥ 4

जातं किल महद्युद्धं ताम्रैरसालेऽरिपर्वते ।
तस्मादतीव सङ्क्रुद्धो दिल्लीन्द्रः स्वस्य सैनिकान् ॥ 5

लिखित्वा प्रेषयामास पपत्रमेतादृशं तथा (दा) ।
बहादुर दिलेलाद्याः शृण्वतां शासनं मम ॥ 6

मृतं किमिति नो तस्मिन् युद्धात्सालेऽरिपर्वते ।
कथमेतेऽतिविख्याताः शूराः परिघबाहवः ॥ 7

आहवे नैव विधृतास्तेनैते शाहसूनुना ।
देशोऽप्यशेषतस्तावल्लुठितस्तेन मामकः ॥ 8

पर्वताश्चापि विख्याता राजपुत्रैः सुरक्षिताः ।
क्षणेन तेन ते सर्वे राजपुत्रा महाबलाः ॥ 9

बन्धुभिः पुत्रदारैश्च सहितास्तत्र पातिताः ।
तेषां तत्कदनं श्रुत्वा [1]मयापि किं जीव्यतेऽधुना ॥ 10

कथमेतादृशं कर्म समीपस्थैर्विलोक्यते ।
किं तेन भवतां शक्तिर्महत्कार्यं प्रकुर्वताम् ॥ 11

तार्क्ष्येणेव भुजङ्गानां प्रशमं प्रापिता किल ।
यदिलोऽपि समीपस्थस्तथासौ कुतुपोऽपि च ॥ 12

फैरङ्गिणश्च कार्णाटाः श्यामास्याः सिन्धुमध्यजाः ।
उपायनान्यनेकानि प्रेषयन्ति स्वगुप्तये । 13

देश एव कियानस्य दत्वा सख्येन तिष्ठता ।
यदिलेनातिमूढेन कथं तूष्णीं निलीयते ॥ 14

लक्षद्वयं त्रयं चैव वराहाणां स्वमस्तके ।
गृहीत्वास्मै तुरुष्कोऽपि प्रददौ कुतुपोऽप्यसौ ॥ 15

अन्येऽपि बहवस्तेन दर्पेणैव विनिर्जिताः ।
न स्वपन्ति दिवारात्रौ स्वस्वदुर्गे सुराक्षिते ॥ 16

तस्मात्सर्वे भवन्तश्च तेऽपि तद्भयपीडिताः ।
एकीभूय चतुर्दिक्षु धावयित्वा समन्ततः ॥ 17

---

1. मया किं जीव्यतेऽधुना समीचीनः पाठः ।

देशादिकं गृहीत्वाऽस्य रोधः किं न विधीयते ।
ततस्ते रोधिताः सर्वे प्रदेशास्तस्य दुर्मतेः ॥ 18

पश्चात्किं तेन कर्तव्यं पर्वताग्रस्थितेन वै ।
एवं बहुविधं क्रौर्यात् लिखितं तेन शासनम् ॥ 19

श्रुत्वा प्रत्युत्तरं ताभ्यां लिखितं तन्निशम्यताम् ।
आज्ञा प्रमाणमस्माकं नास्ति काचिद्विचारणा ॥ 20

निदेशकारिभिः(कृ)त्ये कर्तव्यः कथमाग्रहः ।
वयं तावद् गृहोत्पन्ना वर्धिताश्चैव भूरिशः ॥ 21

तस्मादस्मद्विधैस्तावत् पाल्या ह्याज्ञैव केवलम् ।
गम्यतेऽद्यैव तद्देशे स्वामिनां शासनादितः ॥ 22

परं विज्ञाप्यते किञ्चित्कृपया तद्विचार्यताम् ।
बद्धमूलो रिपुस्तावदुपायज्ञोऽपि भूरिशः ॥ 23

जेतव्यः कथमस्माभिः शतवर्षमधः स्थितैः ।
पर्वतानां शतं तावद्धान्यमुत्पद्यते यतः ॥ 24

तादृशं च तथैवान्यन्नवीनं प्रविधीयते ।
प्रत्येकं पर्वते तस्मिन् सहस्रद्वितयत्रयम् । 25

सैन्यं संस्थापितं तस्य [1]कर्तृत्वं च निगद्यते ।
पर्वतादर्धमायान्ति पत्तयः सर्वतो दिशम् ॥ 26

---

1. धृष्टता च निगद्यते इति पाठः सङ्गतो भाति ॥

यद्यन्निष्पद्यते [1]तत्तल्लुण्ठित्वा च समन्ततः ।
मूषका इव निर्यान्ति लोकानां प्राणमोषकाः ॥ 27

अस्माकमश्व वाराणां सैन्यं सम्भूय तिष्ठति ।
[2]तस्योपर्येव विख्यातः शिवोऽसौ युद्धदुर्मदः। 28

श्येनवत्सेनया सार्धं निष्पतत्यसिहस्तकः ।
स केन [3]रक्षणीयोऽस्ति मामकीनैरधः स्थितैः ॥ 29

अफ्जलोऽपि हतो येन [4]एकेनैव महामतिः ।
महाबलो महाबाहुरेदिलस्यातिसम्मतः ॥ 30

तथैवान्ये मुषाखानप्रमुखाः शतशो हताः ।
ततस्तैस्तत्र निपुणैः सख्यं कृत्वोपसान्त्वितः ॥ 31

स्वामिनो मातुलस्तावच्छास्ताकानोऽतिवीर्यवान् ।
लक्षद्वयाश्ववाराणां गजानां शकटादिभिः ॥ 32

प्राकारस्थोऽतिसन्नद्धः सदैवासीत्सुरक्षितः ।
तस्य पुत्रोऽपि तत्तुल्यो भवद्भिर्वर्धितोऽभवत् ॥ 33

रावणस्य यथा पुत्रः शक्रजिद्राक्षसस्तथा ।
लक्ष्मणेन यथा पूर्वं लङ्कायां विनिपातितः ॥ 34

---

1. लुण्ठयित्वेति च पाठान्तरम् 'लुण्ठयित्वा समन्ततः' इति ॥
2. अश्वारोहे सुविख्यातः इत्यर्थे ।
3. वारणीयोऽस्ति इत् पाठः सुगमः सङ्गतश्च भवति ॥
4. अफजलो निहतो येनाप्येकेनैव इति पाठः ।

तद्वच्छिवेन तेनाजौ शक्त्या विनिहतः स्वया ।
ततः स शास्तिखानोऽपि छद्मना [1]केन निर्गतः ॥ 35

तत्सर्वं स्वामिभिस्तावन्नश्रुतं वा न वीक्षितम् ।
भवतामग्रतोऽत्युग्रैः सभायां तैर्महत्तरैः ॥ 36

दशद्वादशसाहस्रैरश्ववाराधिपैः स्थितम् ।
तत्राप्यशस्त्रककरः क्रूरत्वं न विमुक्तवान् ॥ 37

द्रष्टव्यं स्वामिभिस्तत्र कियद्यत्नेन रक्षितः ।
तथापि पक्षिवत्तूर्णं पुत्रेण सह निर्गतः ॥ 38

तादृशेऽस्मिञ्छिवे शत्रौ नानाछ(द्म)समन्विते ।
स्वामिनां शासनाद्भीतैरस्माभिः परिधाव्यते ॥

यत्र यत्र[2] ततस्तेन स वै मार्गो निरुध्यते ।
पक्षी[3] चापि न निर्गच्छेत्तस्मात् पर्वतसङ्कटात् ॥ 40

तस्मादस्माकमश्वानां लक्षमप्यतिशिक्षितम् ।
धावते नर्तने चैव तथैव परिवर्तने ॥ 41

समीपं नीतमप्यस्मिन् किं करिष्यति कथ्यताम् ।
तन्मध्ये दाक्षिणात्या ये स्वामिनां वै पुरातनाः ॥ 42

---

1. केन केनापीत्यर्थे । न तु प्रश्नार्थे । तेनति च पाठः युज्यते ।
2. गतं तेन ।
3. न पक्षी चापि निर्गच्छेत् इति पाठान्तरम् ।

वर्तते तेषु मुख्योऽसौ जाधोरायो महाबलः ।
स तस्य मातुलसुतः स्वसैन्यपरिवारितः ॥ 43

तथैव शूरो हबसी हिंलालाख्योऽतिवीर्यवान् ।
द्वावप्यमू जनस्थानान्निर्गतौ स्वामिनां भयात् ॥ 44

ततोऽन्ये तेषु ये किं(के)चित्तद्दुःखपरिपीडिताः ।
विमनस्का निरालम्बा बम्भ्रमन्त्यनिशं भ्रमात् ॥ 45

एको विभीषणस्तेन रावणेनापि (प) मानितः ।
ततस्तस्य कथं जातं न [1]किञ्चित्स्वामिभिः श्रुतम् ॥ 46

ज्वलयत्येव सर्वाङ्गं कञ्चुकादग्निरुत्थितः ।
तद्वत्संवर्धितावेतौ निःश्वसन्ताविवोरगौ ॥ 47

तौ तत्पर्वतदुर्गस्थौ कथं नापकरिष्यतः ।
तस्मादेकः प्रकारोऽसावस्माभिः प्रविलोक्यते 48

सख्यसंख्येन जेतव्यः केवलेनामलेन सः ।
स्वामिभिस्तेन युद्ध्यद्भिर्व्यतीता [2]वर्ष सन्ततिः ॥49

तन्मध्ये सार्धवर्षं वा वर्षं वा सख्यतो ह्यसौ ।
स्ववशे स्थापितस्तावत्पुनरुत्थापितो यथा ॥ 50

---

1. तन्न किं स्वामिभिः श्रुतम् । इति पाठान्तरम् ॥
2. वर्षविंशतिः इति पाठान्तरम् ॥

तद्बद्धिचार्य चाराणामग्रणीः स हितो द्विजः ।
दूतत्वे प्रेषितोऽस्माभिर्भाषाभिज्ञोऽभवद्यतः ॥

ततस्तेनातिनिपुणं प्रविचार्य विवेकतः ।
काजी हैदर नामासौ प्रेषितो यवनोत्तमः ॥

स यावत्स्वामिनामाज्ञाप्रकारो नावलोक्यते ।
तावत्संस्थापितोऽस्माभिर्भृत्यैराज्ञानुवर्तिभिः ॥

इति नयभयभीतै दुर्विनीतैर्विनीतैः
प्रणयविघटनार्थं किन्तु तद्घट्टनार्थम् ।
वृतिवलयवितण्डे स्वे परण्डाख्यदुर्गे
निगडितचरणस्तैस्तिष्ठति स्थापितोऽसौ ॥

॥ इति श्रीमज्जयरामकविकृतौ शिवराजचरित्र-
वर्णनं नाम द्वितीयोऽध्यायः ॥

॥ तृतीयोऽध्यायः ॥

राजोवाच-

तत्पश्चादग्रजैः श्रीमत्स्वामिभिः किमनुष्ठितम् ।
प्रोच्यतामादितः सर्वं सन्धिभङ्गोऽभवत्कथम् ॥ 1

कविरुवाच-

भवतां यः खवासाख्यः खान इत्यभिधीयते ।
तेनैतत्सर्वमुदितं तन्न किं ज्ञायतेऽपरम् ॥ 2

पत्युरन्तः पुरमपि प्राकारान्तर्गतं ततः ।
महाराजोऽतिधर्मात्मा शिवराजोऽग्रजस्तव ॥ 3

स्वगतं चिन्तयामास तथा च कविभिर्बुधैः ।
दृष्टं किल खलस्यास्य खवासाख्यस्य दुर्मतेः ॥ 4

चरितं वर्वरीत्येतत्स्वस्य राज्यस्य मञ्जकम् ।
यदा यदिलशाहेन स्वपदे स्थापितः सुतः ॥ 5

औरसोऽतिलघुस्तस्मात्साचिव्येऽसौ व्यवस्थितः ।
ततोऽवरङ्गशाहस्य तथैव कुतुबस्य च ॥ 6

उपायनादिदानेन तोषयित्वा पुरातनान् ।
सैनिकानविचार्यैव पात(बाद)शाहपदे स्थितम् ॥ 7

ररक्ष स्वाम्यहो ह्येतन्महाराजो महामतिः ।
तद्बिजापुरमेतेन श्यामास्येन विनाश्यते ॥ 8

तस्मादस्माभिरेवादौ गृहीत्वा तत्पुरं महत् ।
पश्चात्तस्य सुतायैव देयं नोचेन्निमज्जति ॥ 9

ततो ह्यानन्दराजस्य प्रतापविधिपूर्वकम् ।
पत्रं व्यलेखयत्तूर्णं लेखकैर्मन्त्रकोविदैः ॥ 10

देशोऽवरङ्गशाहस्य तथैव कुतुबस्य च ।
अन्येषामपि यःकश्चिन्मध्ये मध्ये व्यवस्थितः ॥ 11

स सर्वोऽपीक्षुवत्तावद्धिनिष्पीड्योज्झितोऽभवत् ।
ततस्तैरतिनिर्विण्णैः सख्यं कर्तुं विचार्यते ॥ 12

तस्माद्धिहाय तद्देशं स्वसैन्यपरिवारिताः ।
सम्भूय वायदेशादि यावल्लक्ष्मेश्वरो भवेत् ॥ 13

तावत्ततोऽपि पुरतः कर्तव्यःस्ववशे ह्यसौ ।
एवं क्रुद्धो महाराजस्तुरुष्के दुष्टकर्मणि ॥ 14

स्वकीयदूतवर्योऽसौ श्रीमद्बाबाजि नायकः ।
तूर्णमाकारितस्तस्माद् बुध्या यो धिषणाधिपः ॥ 15

अभ्यर्णमागते तस्मिन् दूतवर्येऽतिकोविदे ।
ततः प्रस्थापयाञ्चक्रे स्वसैन्यपरिवारितम् ॥ 16

जानानं [1]सर्वकार्यार्थं आनाजीपण्डितं जवात् ।
सार्धं प्रस्थापितः पश्चात्कोण्डाजी नाम [2]विश्रुतः ॥ 17

---

1. सर्वकार्य प्रयोजनज्ञं इत्यर्थे । ज्ञातारं सर्वकार्याणामिति तु सुगमः पाठः ॥
2. प्रसिद्धवाचक नाम पद प्रयोगे सति तदर्थकविश्रुतपदप्रयोगस्य सार्थक्ये पाठका एव प्रमाणम् ।

[1]याप्ययानादिदानेन नानावस्त्रैरलङ्कृतः ।
सुवर्णवलयद्वन्द्वं तत्करद्वन्द्वयोर्महत् ॥ 18

निचिक्षिपे नृपेणासौ निगूढं दृढशिक्षितः ।
गणाजी कोऽथ मोत्याजी खवलेकरमामकौ ॥ 19

तावप्यतिबलौ तैस्तैः समयोचितभूषणैः ।
भूषयित्वा ददौ सार्धं सम्मतैः सैनिकैः सह ॥ 20

वन्दित्वा ते पदद्वन्द्वं नृपतेः प्रस्थितास्त्रयः ।
मौनेनैव ततस्तेऽमी शमीवृक्षस्य पल्लवैः ॥ 21

उत्तंसितशिरस्त्राणाः प्रदक्षिणमथो ययुः ।
यावद्राजापुरे गत्वा श्रीमदानाजिपण्डितैः ॥ 22

दिनत्रयं पुरो गत्वा साध्यासाध्यविचारणाम् ।
चारमुख्यमुखात्पूर्णं श्रुत्वा तूर्णं विचार्यते ॥ 23

तावदेतेऽपि संयातास्तत्क्षणात्क्षणदामुखे ।
सम्भूय सम्यक् तैःसर्वैर्माला निःश्रेणिसाधकैः ॥ 24

शार्दूलनखवल्लोहनिर्मितैर्नखरैर्युतान् ।
गोधाधरान् कीलधरान् वलीमुखशिलीमुखान् ॥ 25

तांस्तानाहूय तैः सार्धं कृतपूर्वावलोकनैः ।
सावधानतया रात्रौ प्रययुः साधनोद्धताः ॥ 26

1. याप्ययान् - A. Palanquin

आनाजिपण्डितैस्तेषां पश्चाद्भागे महावने ।
निलीय सेनया सार्धं पृष्ठरक्षतया स्थितम् ॥ 27

एक एव हि लोकेऽस्मिन् अद्वितीयतया पुनः ।
सम्भवामीति सर्वेषामुत्पन्ना ज्ञानिवन्मतिः ॥ 28

पतिकार्यसहायास्ते सहायासा उपत्यकाम् ।
प्राप्ताः प्रपातनिकटं सङ्कटेन महीयसा ॥ 29

ऊर्ध्वमालोकयामासुर्लोकालोकमिवोच्छ्रितम् ।
अभवन्गतगर्वास्ते सर्वत्रोच्छ्रायदर्शनात् ॥ 30

ततस्तैःसाधनैर्युक्ताः कृतव्यत्यासनामकाः ।
हस्ताहस्तिकदानादि दत्वाध्यारुरुहुस्तदा ॥ 31

मौनेनाधित्यकामप्यध्यारूढा दृढायुधाः ।
तूर्णं कर्णालवाद्यस्य शब्दं चक्रुः समन्ततः ॥ 32

ततस्तेनातिशब्देन व्याप्तमासीद्दिशान्तरम् ।
अध्यक्षोऽभूद्यामिकानां बाबूखानेति नामकः ॥ 33

तेनोक्तं केन केनेदं वाद्यमाप(पा)द्यते भृशम् ।
यामिकैः सामिसंलग्ननिद्राकुलितलोचनैः ॥ 34

उन्मुच्य वदनाद्वस्त्रं शस्त्राण्यादाय धावितम् ।
दृष्ट्वा पदातिपृतनां धावमानामितस्ततः ॥ 35

नागराणां ततः शब्दः क्षुब्धसागरसन्तिभः ।
सञ्जातस्त्रासजनकः शनकैर्व्यानिशे दिशः ॥ 36

ततो मुद्राधिपो मुख्यः कौशेयकसहायवान् ।
[1]कक्षासु रक्षितैर्दक्षैस्तार्क्ष्यः सर्पेष्विवापतत् ॥ 37

समायान्तमतिक्रोधात् प्रसिद्धं युद्धदर्मदम् ।
कोण्डाजी खड्गमुद्यम्य तस्यैवाभिमुखोऽभवत् ॥ 38

सैनिकाः सैनिकैः सार्धं आयुधैर्युद्ध कोविदाः ।
रे गृहाण गृहाणेति युयुधुः शब्दपूर्वकम् ॥ 39

मुद्राधिकारिणा केचित् क्षुद्रा निर्स्त्रिशपाणिना ।
पातिताः प्रथमं तावत्कोण्डाजी रणपण्डितः ॥ 40

स्वेन चण्डासिना तस्य मुण्डं कायादखण्डयत् ।
तावच्चण्डांशुकिरणैरारक्तै व्योममण्डलम् ॥ 41

स्पृष्टमासीदहो तत्र [2]किञ्चिदुत्प्रेक्ष्यते परम् ।
जीवोऽपि तत्तुरुष्कस्य देहवत्क्रोधमूर्थितः ॥ 42

कण्ठाद्बहिरिवागत्य सूर्यस्तेनाहतो हृदि ।
तस्मात्तद्रक्त सम्मिश्रास्तमिस्रान्ते रवेः कराः ॥ 43

---

1. रक्षकैर्दक्षैः 2. ततः परमेव किञ्चिद्वस्तु दर्शनार्हं जातम् ॥ पर्वते अरण्ये तमसि सम्पन्नत्वादाक्रमणस्य कोवा हतः कुत्र पतितः व्रणं कीदृशमिमित्यज्ञातावस्थायां प्राभातिकप्रकाशे व्याप्ते सत्येव किमपि द्रष्टुं योग्यमस्ति ।

शनैः शनैर्बहिर्याताः खगाः क्रोशसमन्विताः ।
ततः समभवद्युद्धं यत्र यत्र जनैः सह ॥ 44

तत्रत्यो विस्तरस्तावद्वक्तुमेव न पार्यते ।
नागोजीपण्डितस्तावद्रावं शुश्राव भैरवम् ॥ 45

स जीवविह्वलतया द्वारपालं स्म पृच्छति ।
किमिदं किमिदं पश्य कस्य कोलाहलो महान् ॥ 46

तावत्पदातयः केचित् महाशब्दान्विता जवात् ।
चक्रुशुर्द्वारिमासाद्य निश्वासाऽऽपूरितोदराः ॥ 47

सुप्तोऽसि किमहो ब्रह्मन् गृहीतः पर्वतः किल ।
राजद्वाराग्रतस्तावन्मुद्राधिपतिरप्यसौ ॥ 48

पतितोऽस्तशिराश्छित्वा किमिदानीं विचार्यते ।
एवं वदत्स्वहो तेषु किं कर्तव्यमिति स्थितम् ॥ 49

गणाजी स्वगणैस्तावत्तद्गृहाभिमुखो ययौ ।
तमायान्तं समालोक्य स्वसैन्यपरिवारितम् ॥ 50

झटित्यन्यविमार्गेण जीवमात्रेण निर्गतः ।
तत्पश्चान्मौक्तिकाख्योऽसौ तृतीयस्तत्पलायनम् ॥

ज्ञात्वा संशोधयामास तावदन्याधिकारिणः ।
धृत्व धृत्वा समानीतास्तैस्तैः सर्वं निवेदितम् ॥ 52

ततो मुख्यं गृहं राज्ञां अन्येषां चाधिकारिणाम् ।
सम्मृग्यादौ ततः पश्चात्प्राकारं च समन्ततः ॥ 53

प्रविलोक्य प्रतिद्वारि स्थापिताः स्वस्वरक्षकाः ।
ततः स जवमास्थाय महाराजाय सत्वरम् 54

पत्रं [1]विलिलिखुस्तावद् दानानीपण्डितैरपि ।
धावित्वा वै [2]समायान्तं हर्षनिर्भरमानसैः ॥ 55

ततो दिनद्वयेनैव प्रविष्टः पत्रहारकः ।
गृहीतोऽसौ पनालाख्यः [3]पर्वतोऽत्युच्चकैर्वदन् ॥ 56

ददौ पत्रं ततः पश्चात् जानुभ्यामवर्ती गतः ।
महाराजस्ततस्तूर्णं वराहाणां शतं तदा ॥ 57

सशर्करं करे कृत्वा तन्मुखाम्भोरुहेऽक्षिपत् ।
ततः सम्फुल्लनयनः सन्तोषादबिलम्बतः ॥ 58

दुन्दुभिध्वानसहितान्यग्नियन्त्राण्यवासृजत् ॥ 59

विजयपुरमिदानीं गृह्यतेऽस्माभिरित्थं
समजनि निनदोऽग्रे दुन्दुभेः सम्भ्रमेण ।
अवददिव हि तावत्कन्दरासन्निविष्ट-
प्रतिनिनदमिषात्किं पर्वतोऽप्येवमुच्चैः ॥

॥ इति श्रीमज्जयरामकविविरचिते पर्णालपर्वताख्याने
शिवराजचरित्रे तृतीयोऽध्यायः ॥

---

1. व्यलीलिखत् । 2. समायातम् । 3. शैल इत्युच्चकैर्रवदन् ।

॥ चतुर्थोऽध्यायः ॥

अथान्यस्मिन्दिने तावद्राजा राजीवलोचनः ।
सुवर्णसूत्रसंवीतैर्नानावस्त्रैरलङ्कृतः ॥ 1

सचिवैः सैनिकैः सार्धं तं गिरिं द्रष्टुमाययौ ।
दधिदूर्वादिकं दृष्ट्वा सवत्सां धेनुमस्पृशत् ॥ 2

जयघोषवतो विप्रान्नमस्कृत्य यथाविधि ।
सुखासने समारूढस्तावदभ्यर्णमागतः ॥ 3

अम्भोभिः पूर्णकुम्भोऽग्रे सुवासिन्याहृतस्तदा ।
तद्दक्षिणमथो कृत्वा सर्वलोकनमस्कृतः ॥ 4

आतपत्रकृतच्छायः पर्वताग्रादवातरत् ।
पञ्चवाडपुरे श्रीमदम्बायाश्चरणाम्बुजम् ॥ 5

नत्वाऽऽशिषो गृहीत्वास्याः पुनर्नत्वा कृताञ्जलिः ।
प्रयाणोन्मुखतां दध्रे स तदा नृपकेसरी ॥ 6

वेत्रपाणिशतेनासौ नामग्रहण पूर्वकम् ।
नमस्कारमयं शूरः प्रकरोति विलोक्यताम् ॥ 7

एवं निवेदितान् सर्वांस्तान् शूरान् प्रीतिपूर्वकम् ।
ताम्बूलं दापयित्वाग्रे धावमानान् पुरःसरान् ॥ 8

वाजिवाहान् दन्तिवहान् हेषाबृंहितसङ्कुलान् ।
निर्स्त्रिंशखेटककरैः परितः परिवारितान् ॥ 9

स्वहस्तेन यथामानं सम्भव्योभयपार्श्वयोः ।
प्रतस्थे तूर्यनिर्घोषैः घोषयन् सर्वतो दिशः ॥ 10

वाजिराजिखुरोत्खातधूलीपटलपाटलाम् ।
पीतवस्त्रातपत्रस्य [1]रविस्तत्र छविं दधौ ॥ 11

ततस्तीरे तु सावित्र्या महार्हनगरोत्तमे ।
नालिकेरेक्षुपनसखर्जूराम्रातकैर्वृते ॥ 12

दाडिम्याक्रोटकदलीद्राक्षामण्टपसङ्कुले ।
मध्याह्नमनयद्राजा वालव्यजनवीजितः ॥ 13

जातीचम्पकमालत्याद्यनेककुसुमैर्नवैः ।
उत्तंसमालावलयान्याजह्रुः सैनिका अपि ॥ 14

ततः पौलस्त्यनगरे परमानन्दनन्दितैः ।
रसैस्तु पञ्चदशभिः कवीन्द्रैवर्द्धि(वन्दिभिः)द्विजैः ॥ 15

गीयमानं यशः स्वीयं श्रुत्वा श्रुत्वा शनैः शनैः ।
नरयानादवारुह्य चतुःशालमनोरमम् ॥ 16

मन्दिराग्र्यं समासाद्य एक एवाग्रगोऽभवत् ।
गोस्वामिचरणद्वन्द्वं [2]वन्दयामास मन्दिरे ॥ 17

---

1. रवेस्तत्र ।
2. ववन्दे तत्र मन्दिरे । वन्दयामासेति प्रयोगश्चिन्त्यः ।

गोस्वामी च ततस्तस्य हस्तं विन्यस्य मस्तके ।
पूर्णसाम्राज्यदात्रीभिराशीर्भिः पर्यतोषयत् ॥ 18

यथोचितानि वस्त्राणि रत्नानि विविधान्यपि ।
विन्यस्याग्रे स नृपतिर्नमस्कृत्य पुनः पुनः ॥ 19

प्रययौ सैनिकैः सार्धं पौरानानन्दयच्छनैः ।
ततः श्रीमत्प्रतापाख्ये पर्वते पुष्पितद्रुमे ॥ 20

पारे गिरां स्थितवति प्राकारोच्छ्रायशोभिते ।
आरुरोह नृपस्तस्मिन्नाप्तैः कतिपयैर्जनैः ॥ 21

दूरे संस्थाप्य यानानि ततः सन्त्यक्तपादुकः ।
आलोक्यायतनं देव्याः [1]पद्भ्यामेवान्वपद्यत ॥ 22

सौधं सुवर्णरुचिरैस्स्तम्भैर्गगनचुम्बिभिः ।
स्तम्भितं हेमकुम्भैश्च पताकाभिलङ्कृतम् ॥ 23

सौवर्णरौप्यफलकैः कवाटैर्दिक्चतुष्टये ।
स्फुटं प्रतीयमानं यत् सुरज्येष्ठमिवाननैः ॥ 24

घण्टामृदङ्ग[2]काहालदुन्दुभिध्वनिनादितम् ।
कालोचितमहापूजासंन्यापृतजनैर्वृतम् ॥ 25

---

1. पद्भ्यामेवाभ्ययान्नृपः । अन्वपद्यत इति आगच्छदित्यर्थे न प्रयुज्यते । अनुपूर्वकस्य पदगतौ इति धातोः अनुगमने एवशक्तत्वात् ।

2. काहलेति वक्तव्ये छन्दोभङ्गभिया काहालेतिलपितमिति भाति ।

एकत्र वेदशास्त्राणां अध्यापक(न)रवान्वितम् ।
एकत्र वलभीसंस्थैः शुकैःकेकिभिरुच्छिखैः ॥ 26

सारिटाचटकैश्चापि कपोतैश्चापि नादितम् ।
पुरद्वारमहावेद्यामुच्छ्रितासनसंस्थितैः ॥ 27

पुराणश्रवणायातैर्व्याप्तं वर्णचतुष्टयैः[1] ।
एकदेशेऽन्नसत्रस्य शालाभिरुशोभिते ॥ 28

दर्शनायागतैस्तत्र मुहुर्मुहुरवेक्षितम् ।
वानरैः पक्षिभिश्चापि भक्षितार्धफलैर्वृते ॥ 29

प्राङ्गणे कुत्रचिद् व्याप्तं बालैस्तद्ग्रहणोत्सुकैः ।
महामण्टपमालोक्य ततो देवीं व्यलोकयत् ॥ 30

[2]हैमस्तम्भमये पीठे तिष्ठन्तीं भक्तवत्सलाम् ।
[3]मञ्जीरयुग्मविलसद्गुल्फयुग्मपदाम्बुजाम् ॥ 31

स्फुरन्मणिप्रभायुक्त(भास्वत्)कटिसूत्रोपशोभिताम् ।
रत्नकङ्कणकेयूरमुक्ताहारविराजिताम् ॥ 32

अनर्घ्यरत्नयुक्ताभिर्मुद्रिकाभिरलङ्कृताम् ।
पूर्णचन्द्रार्कबिम्बाभ्यां तुलिताभ्यामहर्निशम् ॥ 33

---

1. चातुर्वर्ण्यैः परीवृतम् ।
2. हैमस्तम्भोन्नते पीठे इति वक्तव्ये हैम(हेम) स्तम्भमये पीठे इति कथितम् ।
3. स्वर्णमञ्जीरविलसद् गुल्पशोभिपदाम्बुजामिति सङ्गतः पाठः ।
युग्मशब्दाम्रेडनं कबेरनुचितत्वात् ॥

ताटङ्काभ्यां कर्णयुगे सौवर्णाभ्यां विभूषिताम् ।
शीर्षपुष्पोच्छ्रितैरुस्रैरुत्तंसितशिरोरुहाम् ॥ 34

असीमसीमसीमन्तसिन्दूर द्रवमण्डिताम् ।
नासामुक्ताफलं यस्या दन्तोष्ठद्युतिपाटलम् ॥ 35

दध्रे शुकास्यसंसक्तपक्कदाडिमबीजताम् ।
शरच्चन्द्राननां गौरीं प्रोत्फुल्लकमलेक्षणाम् ॥ 36

आयुधाष्टकविस्पष्टमुष्टिसौष्टवशोभितैः ।
बाहुभिर्भासमानाङ्गीं महिषासुरमर्दिनीम् ॥ 37

मञ्जिष्ठरागसौवर्णवस्त्रयुग्मेन शोभिताम् ।
प्रस्नुतस्तनयुग्मोत्थदुग्धपानाय लोलुपे ॥ 38

वत्सलां भक्तवत्सेऽस्मिन् कामधेनुमिव स्थिताम् ।
प्रणम्य दण्डवद्भूमौ पुनः पुनरतन्द्रितः ॥ 39

प्राञ्जलिः प्राङ्गणादग्रे प्रह्वस्तिर्यग् व्यवस्थितः ।
ततः पूजासमारम्भं चक्रेनृपतिसत्तमः ॥ 40

पाद्यार्घ्याचमनीयादि मधुपर्कं विधाय सः ।
पञ्चामृतघटैः सम्यक् स्नापयित्वा यथाविधि ॥ 41

शुद्धोदकैश्च संस्नाप्य क्षौमं वस्त्रयुगं ददौ ।
अलङ्कारान् हरिद्रां च कुङ्कुमं कज्जलं तथा ॥ 42

गन्धं पुष्पं च धूपं च दीपं खाद्यं निवेद्य च ।
नैवेद्यं षड्रसैर्युक्तं विनिवेद्य ततःपरम् ॥ 43

ताम्बूलं दक्षिणायुक्तं फलं नीराजनं ततः ।
सुपुष्पाञ्जलिना मन्त्रैः पुराणस्तवसंयुतैः ॥ 44

प्रदक्षिणानमस्कारैर्नृत्तगीतसमान्वितैः ।
क्षमापनैश्च सा देवी प्रसन्नवदाम्बुजा ॥ 45

वरं दक्षिणहस्तेन ददौ द्रुतमभीप्सितम् ।
ततः प्रदक्षिणीकृत्य नमस्कृत्य पुनः पुनः ॥ 46

मिथुनानां शतं पश्चाद् द्विजातीनामपूजयत् ।
नित्यदानविधिं कृत्वा कवि पण्डितगोष्ठिभिः ॥ 47

सन्तुष्टः काव्यबन्धादि शृण्वंस्तत्तद्रसाकुलः ।
प्रमृष्टं रुक्मपात्रस्थमन्नं षड्रसमिश्रितम् ॥ 48

भुक्त्वा वस्त्राणि गृह्णाति तावत्सूर्योऽस्तपर्वते ।
अम्बुधेः शम्बरं तर्तुमम्बरं दीर्घमत्यजत् ॥ 49

अथोदयगिरेर्मूर्ध्नि सुधांशुरुदयं वहन् ।
देव्यग्रदीपमालाया मौलिदीपतुलां दधौ ॥ 50

नृत्तगीतविनोदादिसपर्याकुशलैर्जनैः ।
प्रतिपर्वोत्सवस्तावत्तत्र रात्रौ व्यजृम्भत ॥ 51

ततः प्रातः स नृपतिः जगदम्बापदाम्बुजम् ।
पुनः पुनः प्रणम्याशु प्रतस्थे कृतमङ्गलः ॥ 52

शैलैः कौलैः पनालेयैः पौरैराराद्विलोकितः ।
दिनत्रयेण शनकैः सेनया सहितो ययौ ॥ 53

ततो वाक्यविलेखाख्यैर्दत्तोपन्तैःस्वशक्तितः ।
अधिकं हेमकुसुमैरर्चितः सर्वदेशजैः ॥ 54

ततः स भूधरपतिं भूधराधिपतिर्नृपः ।
पात्रं कृपाकटाक्षस्य गुरुश्छात्रमिवाकरोत् ॥ 55

ततोऽग्रयायिभिर्भृत्यैर्गोपुरस्थाः स्वरक्षकाः ।
सावधानतया तस्थुः सूचितागमनाः प्रभोः ॥ 56

क्षणं दत्तेक्षणस्तस्मिन् प्राकारे द्वास्थसन्नुतः ।
प्रयातः पुरतस्तिष्ठत्पौरैर्जानपदैर्नरैः ॥ 57

उपायनसपर्याभिः पूजितः परितः स्थितैः ।
वातायनगैः स्त्रीणां वृन्दैरिन्दुमुखैः सुखम् ॥ 58

विलोकितः स्तुतिपदैर्बन्दिभिः संस्तुतो ययौ ॥
अथ प्रदक्षिणेनासौ गच्छन् मार्गेण भूपतिः ॥ 59

जम्बूखर्जूरपनसैराम्रैरक्षोटकैस्तथा ।
नालिकेरैश्च जम्बीरैर्दाडिमैः क्रमुकैस्तथा ॥ 60

कदलीभिःकञ्चनारैस्तथान्यैरपि शाखिभिः ।
मालतीभिर्मल्लिकाभिः सामन्तीभिः समन्ततः ॥ 61

द्राक्षाभिर्मण्डपस्थाभिः कृतछायःस्थले स्थले ।
तेषां फलानि पुष्पाणि पल्लवानि च मञ्जरीः ॥ 62

जग्राहोपायनानीव सविधोपनतानि सः ।
ततः सोमालये नाम्ना तटाके प्रस्फुटाम्बुजे ॥ 63

सारसैश्चक्रवाकैश्च हंसैः संशोभिते तटे ।
मत्स्यैः समुच्चलत्युत्थैः कच्छपैश्च तरङ्गिते ॥ 64

वाताहतिचलाम्भोजोत्पतद्भृङ्गकुलाकुले ।
मणिभङ्गाच्छसलिले श्रान्तविश्रान्तिकारिणि ॥ 65

कर्पूरवापिकातोयमुपस्पृश्य ततः परम् ।
दत्तदृष्टिः समालक्ष्य देवतायतनं पुरः ॥ 66

भूजभूपोत्तचाम्पेयपुष्पैरतिमनोहरैः ।
देवतायतने तस्मिन् लक्षपूजां समादिशत् ॥ 67

पुण्याहवाचनं कृत्वा शैलारोहनिमित्तकम् ।
नित्यदानं विधायासौ द्विजाशीर्वादमग्रहीत् ॥ 68

ततस्तस्मिन्नधिकृतैस्तत्तत्कार्यधुरन्धरैः ।
तत्तन्निवेदितः कार्यं नियुक्तैर्युक्तसङ्ग्रहे ॥ 69

गङ्गायमुनयोः संज्ञां धारयन्तौ महत्तरौ ।
अम्बराख्यानिलयौ कण्ठदघ्नं समन्ततः ॥ 70

*खारीशतसहस्रेण धान्येनाऽऽपूरितौ ततः ।
प्राकारः पर्वतस्याग्रे पश्चाद्भागेऽथ पार्श्वयोः ॥ 71

सम्यङ्निबद्धः सर्वत्र यत्र नीचतया स्थितः ।
अग्नि यन्त्राणि दार्वादिनवीनेन्धनसञ्चयैः ॥ 72

गण्डशैलैः कारवेल्लैर्लोहकण्टकवेष्टितैः ।
लघुदीर्घोपलैर्बाणैर्भिण्डिपालासिपट्टिशैः ॥ 73

गुटिकास्त्रैर्लोहगोलैः शिलीमुखशरासनैः ।
तृणैः काष्ठैर्घृतैस्तैलैर्लवणैर्मधुभिर्गुडैः ॥ 74

अचलः परिपूर्णोऽयं विहितः प्रविलोक्यताम् ।
ततस्तेभ्यो दापयित्वा यथार्हं पारितोषिकम् ॥ 75

मासमेकं स्थितिं तत्र चक्रे वक्रतरे गिरौ । 76

इति नरपतिसिंहस्तद्गिरेर्गह्वरस्थ-
प्रकटनखखनित्रोत्खातभूमेः समन्तात् ।
धननिचयमहार्घीद्गर्जयुक्तस्तदानीं-
अरिनिकरगजारते दिग्गजानाश्रयीरन् ॥ 77

---

* अधिकृतनिवेदनं अनन्वितमिव अत्र अपूर्णमिव च भाति ।
विशेष्यवाचकपदरहितत्वात् ।

विजयपुरपतिस्तद्धज्रपाताभिघात-
प्रचुरतरकठोरारावमाकर्ण्य तूर्णम् ।
सचिवपदमदेनाप्युद्धतः क्रुद्धपूर्वान्
विकलमतिखवासः ख्यापयामास मुख्यान् ॥ 78

॥ इति श्रीशिवराजचरित्रे पर्णालग्रहण वर्णने चतुर्थोऽध्यायः ॥

॥ पञ्चमोऽध्यायः ॥

ततस्ते बहलोलाख्यप्रमुखा मुख्यमन्त्रिणः ।
खवासाख्यं हि विख्याताः प्रोचुराक्षेपपूर्वकम् ॥ 1

तवैवाविनयेनैतदत्याहितमुपस्थितम् ।
यतः सख्यस्य भङ्गेऽसौ शिवराजो व्यवस्थितः ॥ 2

त्वयैतत्सर्वमाक्रान्तं महता बुद्धिशालिना ।
तस्मात्सर्वमिदं राष्ट्रं दृश्यते मज्जनोन्मुखम् ॥ 3

द्रष्टव्यं तावदेतस्य पित्रा शाहमहीभुजा ।
केन केनाप्युपायेन स्थलमेतत्सुरक्षितम् ॥ 4

अनेनैव हि ताम्राणां उत्पातः शामितः स्थितः ।
वेलया सागरस्येव प्रोद्यन्नक्रोर्मिमालिनः ॥ 5

श्रूयते किल हिन्दूनां शास्त्रे कैश्चिदुदाहृतम् ।
कल्किरित्यवताराणां दशमः सम्भविष्यति ॥ 6

छेत्स्यते तेन सर्वत्र व्याप्तं यावनमण्डलम् ।
तस्यैव कल्किनस्तावत् असावग्रे समागतः ॥ 7

दूतो वै प्रतिभात्यस्मान् यतोऽस्मन्निधनोद्यतः ।
अफसलाद्यास्तथास्माकं कियन्तो युद्धदुर्मदाः ॥ 8

पातिताः पुनरप्यन्ये पात्यन्ते तेन नित्यशः ।
ताम्राणामप्यहो तावत् शस्तिखानो महत्तरः ॥ 9

सपुत्रः सोऽपि निर्जित्य कां दशां प्रापितः किल ।
अन्येऽपि बहवो यातास्तथैवान्ये प्रयान्त्यमी ॥ 10

रणे तस्माज्जयं प्राप्य निर्गतः कोऽपि दृश्यते ।
केवलं गजसिह्मस्य सजातीयतया मनाक् ॥ 11

पर्वतव्यत्ययात्तेन जयाभासः प्रदर्शितः ।
आमिषं बडिशे बध्वा मत्स्यो यद्वन्निगृह्यते ॥ 12

तद्वदेतेन तेषामप्याहृताः पर्वता अमी ।
तत्रैकस्मिन् हि सह्याद्रौ कदनं यदभूच्छ्रुतम् ॥ 13

यत्रायं मामको बन्धुर्निबद्धो वन्धुभिः सह ।
अन्येऽप्यहो महत्कर्म सिह्माद्यास्तद्रणाङ्गणे ॥ 14

एकशृङ्खलया बद्धाश्चरणे वारणा इव ।
यस्मिन्नमरसिह्मोऽपि मारितः सह सैनिकैः ॥ 15

न बाबुरहमित्येवमुच्चैः क्रोशन् व्यवस्थितः ।
ततोऽप्यधिकमेतस्मिन् निपेतुस्तस्य सैनिकाः ॥ 16

प्रवदन्तो नवाबश्चेद्धन्तव्यः शास्तिखानवत् ।
हास्यमायात्यहोऽस्माकमौदारामीयपौत्रकः ॥ 17

शिखासूत्रं दर्शयित्वा स्वात्मानं प्रविमुक्तवान् ।
सर्जाखानादयोऽप्यन्ये तर्जितास्तस्य सैनिकैः ॥ 18

तेऽपि सन्त्यक्तशस्त्रास्त्राः किमन्यत्प्रोच्यतामिह ।
मुलाहयाख्यस्य जितःकुञ्जरो जुनराहवे ॥ 19

कथमेतादृशस्तावत्सख्यात्प्रच्यावितस्त्वया ।
इदानीं गच्छ युध्यस्व किमस्मान् परिपृच्छसे ॥ 20

ततः प्रत्युत्तरं तेभ्यः खवासाख्योऽतिदुर्मनाः ।
दीर्घमुष्णं च निःश्वस्य ददौ प्रीतिकरं यथा ॥ 21

तथ्यमेव भवद्भिर्यत्प्रोच्यते स्मत्प्रमादजम् ।
कर्म तावत्प्रवक्ष्यामि भवतां शासने स्थितः ॥ 22

भवद्भिः पालितं पूर्वमिदानीमपि पाल्यताम् ।
पातशाहोऽपि बालोऽसौ अर्पितः श्रीमतां करे ॥ 23

यथा राज्यमिदं सर्वं प्रभवेत्तद्विधीयताम् ।
ततस्तेऽत्यन्तसन्तुष्टाः पुष्टास्तद्वाक्यगौरवात् ॥ 24

प्रोचुः प्रस्तुतकर्तव्ये प्रस्फुरद्बुद्धयस्तदा ।
बाहुलोलो ह्यसौ तावदस्मासु बलवत्तरः ॥ 25

यं समाश्रित्य राज्यश्रीःस्थैर्यं प्राप्य विराजते ।
अनेनैव जितं सर्वं क्रूरं कर्णाटमण्डलम् ॥ 26

अस्मै रत्नादिकं यद्यद्गजवाजिमृगादिषु ।
उत्तमं नरनारीषु तत्तद्रूपैः प्रदीयते ॥ 27

अस्माद्भयमनुप्राप्य शत्रवः शस्त्रमुज्जहुः ।
तस्मात्सर्वमिदं कार्यमेतस्मिन्नेव तिष्ठति ॥ 28

अस्य सर्वं हि कर्तृत्वमस्मद्राष्ट्रविवर्धकम् ।
अतः सम्प्रार्थ्यसेऽस्माभिः शिवराजभयार्दितैः ॥ 29

बिजापुरमिदं तस्माद्रक्षणीयं भवेद्यदि ।
विलम्बस्तर्हि गन्तव्ये न विधेयस्त्वयाधुता ॥ 30

हस्तिद्वयं मदोन्मत्तं तथा वाजिचतुष्टयम् ।
वस्त्राणि च महार्हाणि शस्त्राणि विविधान्यपि ॥ 31

दत्वा प्रादा(स्था)पयंस्तस्मै तद्बालनृपतेः करात् ।
पर्णान्युत्तमवर्णास्ते मन्त्रिणस्तन्महीपतेः ॥ 32

प्रणम्य शिरसा तस्मात् निःसृतः सोऽतिविश्रुतः ।
कारयन् दुन्दुभेर्ध्वानं प्रस्थानसमयोचितम् ॥ 33

ततः क्रोशत्रयादूर्ध्वं त्रिकोटनगरोत्तमम् ।
प्रस्थितः सेनया सार्धं धुन्वन्नत्युत्तमं धनुः ॥ 34

कर्णालनिनदस्तावद् दुन्दुभिध्वानमिश्रितः ।
गजाश्वरथनिर्घोषैर्वर्धितः शत्रुतर्जनः ॥ 35

खुरक्षोदितमश्वानां भूतलादनिलोत्थितम् ।
रेणुमण्डलमाकाशात् अवकाशं निराकरोत् ॥ 36

रेणुमण्डलमाकाशात् अवकाशं निराकरोत् ।
यत्राभूत्सूर्यवाहानां धावनाय क्षमाऽक्षमा ॥ 37

तस्यां प्रधावितैर्नीतः तद्धयैः कुत्रचिद्रविः ।
कवयस्तर्कयांचक्रुः इत्थं ते चक्रवर्तिनः ॥ 38

एवं दिनद्धयेनैव उम्राणीग्रामसन्निधौ ।
यावदागम्यते तावत् पत्रमप्येवमागतम् ॥ 39

मुजाफरमलीकोऽसौ सर्जाखानसमन्वितः ।
राङ्गणीय नगप्रान्ते सेनया सह तिष्ठति ॥ 40

असावतिबलोपेतः सहायार्थं निगृह्यताम् ।
तथा सिद्दीमसूदोऽसौ ह्यादवन्यां निवेशितः ॥ 41

करनोलकरस्तावद् अब्दुल् अजीज् अपि ह्यसौ ।
तथा खिदिरिखानोऽसौ पणिरित्यभिधीयते ॥ 42

नलदुर्गतलादर्वागेवं सेनापतित्रयी ।
क्रयीकर्तुमिनान्यद्धि सैन्यं दैन्यविवर्जितम् ॥ 43

एतैस्त्रिभिर्दिलेलाख्ययखानेन सह शीघ्रतः ।
सङ्गम्योत्कोचदानादि दत्वा सैन्यं प्रयाच्यताम् ॥ 44

तत्सैन्य सहिताः सर्वे भवन्तोऽपि स्वसेनया ।
बहलोलसहायार्थं आयन्त्वित्यपरार्थकः ॥ 45

चारोऽसौ प्रेषितस्तस्मात् सर्वैः सम्भूय शक्तितः ।
जेतव्यः शत्रुरस्माकं शाहराजसुतः शिवः ॥ 46

ततः शिवमहीपालः [1]तालाङ्कानुज बुद्धिमान् ।
कालस्तुरुष्कभूपानां पर्णालाधः स्थितान् स्वकान् ॥ 47

प्रतापानन्दरावादीन् आहूय रहसि स्थितः ।
बहलोह्ययं याति भवद्भिस्तच्च संश्रुतम् ॥ 48

कथमेतेन योद्धव्यमस्मदीयैस्त्वरान्वितैः ।
ततस्तेऽत्यन्तविनयादिदिदमूचुरर्नृपोत्तमम् ॥ 49

निदेशकारिणोह्यस्मत्स्वामिभिः किं विचार्यते ।

राजोवाच–

श्रूयतां प्रोच्यते यावदल्पया स्वीयसेनया ॥ 50

तिष्ठन्नास्ते ह्यदूरेऽसौ तावच्छीघ्रं निगृह्यताम् ।
यथा तृणलवोऽप्यस्य न गच्छेत् यत्र कुत्रचित् ॥ 51

तथा दृढनिपातोऽस्मिन् सिह्मवत्प्रविधीयताम् ।
ततो नृपनिदेशात्ते पर्णान्यादाय सैनिकाः ॥ 52

---

1. तालवृक्ष अङ्कः यस्य तस्य बलभद्रस्य अनुजः श्रीकृष्णः स इव बुद्दिमान् ।

प्रतापप्रमुखा जग्मुर्यावन्तस्तत्र वै स्थिताः ।
दिनद्धयेन निभृतं रात्रौ रात्रौ त्वरान्विताः ॥ 53

जलाशयोऽभवच्छत्रोस्तत्र सैन्यं कियद्धयैः ।
विश्रान्तं कैश्चिदपरैः पश्चात्कैश्चित्समागतम् ॥ 54

ततः सर्वैरनेकत्र स्थित्वा शत्रोः समन्ततः ।
दूरादेव महत्सैन्यं चतुर्दिक्षु विलोकितम् ॥ 55

ततः सर्वैर्विचार्यादौ कैश्चिद्रुद्धो जलाशयः ।
सिद्धीहिलालखानेन तत्सैन्यस्याग्रतः स्थितम् ॥ 56

पश्चाद्धिठोजिशिदाऽसौ क्रोशमात्रादवस्थितः ।
कृष्णाजीभास्करस्तावत्तथा विठ्ठल पीलद्या(देव्)॥ 57

पार्श्वयोर्वैरिसेनायाः सम्यक् सञ्जतया स्थितौ ।
परितः पर्यटन्नासीत् विसो वल्लाल नामकः ॥ 58

तावदज्ञातमेवासीत् अरिभिः करिमध्यगैः ।
नीरपानाय निर्यातो वीरगुप्तो गजव्रजः ॥ 59

ततस्तैः पृष्ठतो दृष्टं वेष्टितं कटकं परैः ।
तावत्प्रतापराजोऽसौ प्रताप इव मूर्तिमान् ॥ 60

धावदश्वसहस्रेण प्रलयाग्निरिवागतः ।
प्रोच्चलद्धूलिधूम्रस्य पश्चाकृत्वा कदम्बकम् ॥ 61

ततस्तद् बहलोलाख्य पठानकटकं महत् ।
दधारान्वर्थनामार्थं तद्वक्तुं केन पार्यते ॥ 62

हयो हयो जिनो जीनो खड्गः खड्गो धनुर्धनुः ।
इति व्यग्रतरं तावत् तत्सैन्यमभवत् क्षणात् ॥ 63

ततस्तेऽत्यन्तविक्रान्ता महाशूरा महाबलाः ।
यत्र यत्र स्थितास्तत्र शस्त्रैः सज्जास्तदाऽभवन् ॥ 64

तावदेषां महावीराः प्रपेतुस्तेषु ततेक्षणात् ।
ततः खणखणाटोच्चैः सम्बभूव द्वयोर्महान् ॥ 65

हयस्थैर्भूतलस्थैश्च घटिकानां चतुष्टयम् ।
केचिन्निपतितास्तेषामेषां तैः केचिदाहताः ॥ 66

परावृत्त्य हयान् केचित् तेभ्यो ह्येते बहिर्ययुः ।
ततस्ते दृढमासज्य जयविस्फूर्जितं धनुः ॥ 67

धुन्वाना जगृहुर्बाणान् वारबाणविदारणान् ।
आयान्त्विदानीमित्युच्चैः प्रोचुराकृष्टकार्मुकाः ॥ 68

जघ्नुर्हयान् हयारूढान् एकीभूय समन्ततः ।
तावदानन्दरायोऽसौ सम्परायश्रियान्वितः ॥ 69

पपात पृष्ठतो भूत्वा वीरैः कतिपयैस्तदा ।
सोऽतिविद्धोऽति क्रुद्धैस्तैर्मस्तके दत्तखेटकः ॥ 70

प्रविष्टः खड्गमुद्यम्य पाठान विकटाटवीम् ।
तेनैवात्युल्बणं तेषां कटकं घटिकात्रयम् ॥ 71

विहितं तावदुन्मत्तः कुञ्जरः पर्वतोपमः ।
विमुक्तस्तेन वै चक्रे कौतुकं सङ्गराङ्गणे ॥ 72

स्वयं तेनातिबलिना त्रोटिता दृढवेष्टिता ।
शृङ्खलैव करे कृत्वा धावित्वा वै समागतम् ॥ 73

भृशं तेनैव विहितं सैन्यमत्यन्तमुल्बणम् ।
स्वीयानेव समीपस्थान् व्यूहस्थानवधीत्तदा ॥ 74

मन्ये शिवसहायार्थे हेरम्बोऽसौ समागतः ।
ततो ह्येतैश्च तेनापि वारणेनाद्भुतो रणः ॥ 75

हासत्रासयुतस्तत्र संजज्ञे वागगोचरः ।
ततो हस्तिपकैस्तस्य पश्चादेव प्रधावितैः ॥ 76

युक्त्या पृष्ठगतैर्धृत्वा पश्चाद्यावद् विधीयते ।
तावत्सिद्धिहिलालोऽसौ स्वपुत्रैः पञ्चभिः सह ॥ 77

गतभीर्निष्पपातोच्चैः श्यामश्यामैः स्वसैनिकैः ।
रूपाजीभोसला तावत् सोमजीमोहित स्तथा ॥ 78

निम्बालकर सिद्धोजी प्रसिद्धो युद्धकर्मणि ।
तेलङ्गदाय सहिताः निष्पेतुरहिते तदा ॥ 79

तावद्धिठोजी सिन्दाऽसौ तथा विठुल पीलद्या ।
उभावप्येकतो यातौ महत्या सेनया सह ॥ 80

महादठाकुरः क्रूरः जाधोरायस्य सैनिकः ।
सोमाजीकेन सहितः सोऽप्यग्रे प्राभवत्तदा ॥ 81

ततस्तेषां पठानानां भायीखानतरीनिति
करीव सङ्गरे तावन्निर्व्यग्रमनसाऽभवत् ॥ 82

नायीकजी पाण्डराऽसौ खाराडा नायकस्तथा ।
तथैवान्येऽपि शतशो निःसृतास्तन्मिखोपरि ॥ 83

ततः समभवत्तेषां एतेषां च महद्रणः ।
बाणैर्बाणधराञ्छूरान् खड्गैःखड्गधरांस्तथा ॥ 84

शक्त्या शक्तिधरान् युद्धे वि व्यधुस्ते निजायुधैः ।
केषाञ्चिद्वाहवश्छिन्नाः केषाञ्चिच्चरणास्तथा ॥ 85

केषाञ्चिन्मस्तकाः खड्गैः निकृत्तार्धाः पतन्त्यधः ।
कश्चिद्रुधिरसिक्ताङ्गः प्रफुल्ल इव किंशुकः ॥ 86

कश्चिद्बाणैस्त्रिके लग्नैः सनिषङ्ग इव स्थितः ।
स्फिकेनैकेन संतिष्ठन् कश्चिद् द्वित्रुटितत्रिकः ॥ 87

कश्चिद् द्वित्रुटितार्धेन खड्गेन हृदि विक्षतः ।
एवं यामत्रयादूर्ध्वं क्रुद्धयोः सैन्ययोर्द्वयोः ॥ 88

रणः समभवद् तावत् यावद् अस्तोऽभवत् रवेः ।
उच्चलद्रक्ततुमुलः प्रवाहस्तत्र निःसृतः ॥ 89

आरक्तरागः सन्ध्यायाः तेनैव विहितोऽभवत् ।
सिद्धोजीनामकस्तावत् निम्बालकरसंज्ञकः ॥ 90

स एव वारणस्तेन रणान्निःसारितस्तदा ।
स्वयं मुक्तः स्थितः पूर्वं शृङ्खलानिगडाद् दृढात् ॥ 91

योगीव सिद्धमार्गेण नीतः श्रीमच्छिवान्तिके(कम्)।
बहलोलस्य विषयी नाम्ना भाग्येन विश्रुतः ॥ 92

श्यामो महमद् बर्कीति जयद्रथ इवाबभौ ।
दौर्योधनैः कतिपयैः सैनिकैः परिवारितः ॥ 93

स वै सूर्यास्तमालक्ष्य पांसुव्याप्ते खमण्डले ।
महावाजिनमारुह्य गजव्यूहाद् विनिःसृतः ॥ 94

दीपाजी नामको ह्येषां रावुतराव इति स्मृतः ।
(रावुत्तराविति विश्रुतः)
सोऽर्जुनत्वमनुप्राप्तो यतः कृष्णसहायतान् ॥ 95

प्रोद्दिदीपे स दीपाजी सकृष्णो भास्करत्विषा ।
आपूरयन्निव स्वीयां प्रतिज्ञां तद्रणाङ्गणे ॥ 96

विकोशं खड्गमुद्यम्य वाजिवेगोद्धतस्ततः ।
वारबाणावृतं शत्रुं स्कन्धदेशे व्यताडयत् ॥ 97

तेन खड्गप्रहारेण शत्रोः कवचपट्टिका ।
समुत्पफाल गगने मेघादचिरभा यथा ॥ 98

ततस्तद्धर्किणा तावत् समुद्यम्य महद्धनुः ।
आकर्णकृष्टबाणेन विद्धो रावुतराव् हयः ॥ 99

स हयस्तेन बाणेन प्रणानेव विमोचितुम् ।
तथा प्रकम्पमापन्नः ततोऽन्यस्मिन् हयोत्तमे ॥ 100

समारूढोऽभवत्तावत्सोऽपि खड्गेन विक्षतः ।
कुक्षौ त्रिके मुखे चैव प्रहारत्रयसंयुतः ॥ 101

तथापि न चचालाजौ यतो जात्यास्ति सैन्धवः ।
ततस्तेन प्रदीप्तेन रावुत्तरायेण सङ्गरे ॥ 102

यमदंष्ट्राप्रहारेण स बर्की मस्तकादधः ।
जत्रुदेशे विकवचे हत्वा भूमौ निपातितः ॥ 103

ततस्तस्य पठानस्य घोटपृष्ठे सुभूषिते ।
समारुह्य समायातो विजयत्वं प्रवर्धयन् ॥ 104

अथतद्धर्किणस्तावन्मृत्युमाकर्ण्य विह्वलः ।
प्रतापदर्शिते मार्गे बहलोलो विनिर्गतः ॥ 105

पश्चात्तस्यातिसंविग्नं हस्त्यश्वरथसङ्कुलम् ।
कटकं लुण्ठयामास सकृष्णो भास्करात्मजः ॥ 106

विजयपुरसमुद्राद‍ुच्चलन्नक्रचक्रात्
समुदितबहलोल पार्वणोऽसौ शशाङ्कः ।
इति खलु निजलक्ष्मीं प्राक्षिपत्कृष्णपक्षे
प्रतिदिवसमशेषां भास्कराद‍ुत्थितेऽस्मिन् ॥ 107

॥ इति श्रीमज्जयरामकविविरचिते पर्णालपर्वताख्याने
शिवराजचरित्रे पञ्चमोऽध्यायः ॥

॥ श्रीविश्वेश्वरार्पणमस्तु ॥



சரசுவதி மகால் நூலக வளாகம்